## ।। अथ चतुर्विंशोऽध्याय: ।। chapter-24

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ चामुण्डां लोक विश्रुताम् ।
हत्वा दैत्यं बकं यत्र देवी चक्रे बकस्थलीम् ।। १ ।।

तस्या: संदर्शनादेव नर: सिध्यति तत्क्षणात् ।
अर्च्चनाल्लभते राजन्निर्वाणपदमुत्तमम् ।। २ ।।

मान्धातोवाच :- कथं बक: पुरा दैत्यो हतो देव्या तपोधन ।
श्रीमालक्षेत्रमाहात्म्य तन्मे कथय सुव्रत ।। ३

वसिष्ठ उवाच :- पुरासीत्पृथिवीपाल बाष्कलिर्नाम दानव : ।
तस्य पुत्रोबकोनाम महाबलपराक्रम : ।। ४

तपस्तप्त्वा हरिक्षेत्रे स पुरा कमलासनम् ।
पर्यतोषयदुग्रेण देवशत्रु: समाधिना ।। ५

अवध्योऽभूत्स देवानां मनुष्याणांच मानिनाम् ।
अभिमानेन पूर्णोसौ नैययाचे वरं स्त्रिय: ।। ६

--------

१- ए- पूरासी
२- ए- पूर्णो

तेन देवाः सगन्धर्वाः सिद्धायक्षाश्च किन्नराः
अर्दिताः शतशो राजन् परित्रेसुः सुरालयात् ।। ७

आक्रम्य मेरुश्रृंगाणि तेन भग्नानि कोटिशः ।
विलुप्तानि विमानानि देवानां दनुजेन वै ।। ८

आश्रमाश्च महर्षीणामुन्मूलितमहाद्रुमाः ।
उत्खातानलकुण्डाश्च कृताः श्वापदवर्जिताः ।। ९

स्वाहाकारस्वधाकारवषट्कारादिकाः क्रिया : ।
निवृत्ता भूतले भूप प्रणष्टेषु महर्षिषु ।। १०

उच्छिन्नेषु मखौघेषु देवा दुर्बलतां ययुः ।
बभूवुर्बलिनो दैत्या बकस्य वशवर्तिनः ।। ११

अथ देवाः परित्यज्य मेरुपृष्ठं भयातुराः
हिमाचलस्य शिखरं सौवर्णमृषभं ययुः
अगाधकन्दरे तस्य प्रविष्टास्तस्थुरन्वहम् ।। १२

---

१ बी ई- परं त्रेसु (ए३) विलुप्तांनि (ए६) मेरुपृष्ठं
२ ए- श्रगां (ए४) कुण्डानि
(ए ५) निवृत

सोऽपि दैत्यः सहानीकैरप्सरोभिश्चदर्पितः
प्राप्य त्रैलोक्यसाम्राज्यं[1] शैलशृंगेषु क्रीडति ।। १३

कदाचिद्भ्रममाणोऽथ दानवेन्द्रो रिरंसया ।
तं देवशिखरं[2] प्राप्तो यत्र ते त्रिदिवौकसः ।। १४

विज्ञाय बक्मायान्तं[3] रथाश्वपदशब्दितैः ।
कन्दरस्था विषेदुस्ते राजन् देवाः सवासवाः ।। १५

हन्त जातं महद्दुःखमस्माकं दानवेश्वरात् ।
यदि ज्ञास्यति दुष्टोऽयमस्मान् हन्यात्क्षणेन तत् ।। १६

इति चिन्ताकुलाश्चक्रुर्न श्वासमपि पुष्कलम्,
मुखं पिधाय पाणिभ्यां स्थिता मौनावलम्बिनः ।। १७

एवं चिन्तयतां तेषां दुःखार्तानां कथंचन
क्रीडित्वा सुचिरं कालं ययौ दैत्योऽमरावतीम् ।। १८

---

१ बी ई खेलति २ सी डी तदेव शिखरं ३ इ सी डी मायान्तं रथ संपद शब्दितैः

ततस्ते सगंताः सर्वे मन्त्रयित्वा परस्परम् ।
देवाः श्रीमालमागत्य तपस्तेपुरतन्द्रिताः ।। १९

तत्र कृत्वा महाकुण्डं वज्रेण विमलोदकम् ।
परिवृत्य सुराः सर्वे उपास्ते सुरेश्वरीम् ।। २०

शीर्णपर्णाशिनाः केचिद्वायुभक्षास्तथापरे ।
दन्तोलूखलिनः केचिदश्मकुट्टाश्च केचन ।। २१

अंबुभक्षाः भक्षरहिताः स्नानहोमादिभिर्नृप ।
देवीमाराधयामासुर्देवा बकवधेप्सवः ।। २२

अथ तत्राश्रमे रम्ये बहुपादपसंकुले ।
कुण्डमध्यान्महोदारं रूपमाबिभ्रती नृप ।। २३

आविर्बभूव चामुण्डा चण्डमुण्डनिबर्हिणी ।
त्रिशूलखट्वांगधरा मुण्डमालाविभूषणा ।। २४

---

आस्त: प्रतिम पंक्ति श्लोक २०स्य प्रथमश्च श्लोक २१-स्य .

(ए १) लु

दंष्ट्राकरालवदना सुकेशा विनतोदरी
आदाय दक्षिणे पाणौ सिंहमद्भुतदर्शनम् ।। २५

कुर्वती निजतेजोभिर्वनं पिञ्जरित द्रुमम् ।
तां दृष्ट्वा देवता: सर्वा: प्रोचु: प्राञ्जलय: स्थिता: ।। २६

त्राहि त्राहीति नो मात: शतशो बकशङ्किता‌न् ।
इत्येव प्रवदन् देवा न परं क्षुब्ध चेतस: ।। २७

देव्युवाच :- न भेतव्यं न भेतव्यं महो देवा: कुतश्चन
अचिरात् हनिष्येऽहं यतो व: शंकितं मन: ।। २८

देवा ऊचु:- यदि त्वं देवि तुष्टासि पालनीया वयं यदि ।
विहायत तदिदं रूपं तिष्ठ मर्त्यवधूरिव ।। २९

वसिष्ठ उवाच :- तथेत्याभाष्य भूपाल चामुण्डा मरुतांगणान् ।
सामान्यरूपमास्थाय स्थितिं चक्रे वराश्रमे ।। ३०

---

श्लोक २७ स्य पंक्ति द्वितीय अधिकं अस्ति——

३ बी ई इत्येवमवदन देवा न परं क्षुब्धचेतस: (अधिक है) २ ई सी नचिरातं

(ए १) विनतोदरी

सामान्यमपि तद्रूपं प्रियायास्त्रिपुर द्विष: ।।
अत्यशेत समस्तानां रूपाणि भुवि सुभ्रुवाम् ।। ३१

विहितोपि दहेदग्निस्तपेदर्को घनावृत: ।।
स्तम्भितोऽपि चलेद्वायुर्धूनोतीन्दु: कृशोऽपि सन् ।। ३२

सुसंहृतमपि व्यक्तं जगन्मातुर्महो महत् ।।
लक्ष्यतेऽन्तर्गतं लोके काचपात्रे जलं यथा ।। ३३

अथ तत्राश्रमे देव्या: क्रीडन्त्या: क्वचिदाययौ ।।
बकस्यानुचरो राजन् करालो नाम दानव : ।। ३४

विहरन् कामरूपिण्या स्थूलाक्ष्या भार्यया सह ।।
हविर्गन्धानुसारेण तत्रागत्य नभस्तलात् ।।
कस्यायमाश्रमोऽस्तीति परिबभ्राम दानव : ।। ३५

---

१ बी स्तम्भितोऽपि चलेद्वायुर्भाति श्रीमान् कृशोऽपि सन्
२ ई दानवा :
३ ए अत्यशेत
४ ए धूनोतीन्दु:

ततस्तत्र वरारोहां दोलाखेलनतत्परां ।।
आवृतां देवकन्याभिः तामवैक्षत भासुरां ।। ३६

ज्वालामिव हुताशस्य धूमसंहतिसम्वृतां ।।
~~प्रभामिव दिनेशस्य बलाहकतिरोहितां ।।~~
लेखामिव मृगांकस्य नीहारपटलावृतां ।। ३७

प्रभामिव दिनेशस्य बलाहकतिरोहितां ।।
असामान्यगुणां देवीं मत्तमातंगगामिनीं ।। ३८

पद्मपत्रविशालाक्षीं पीनश्रोणिपयोधरां ।।
मुनिकन्याकृतिं तन्वीं जगत्त्राणार्थमागतां ।। ३९

वल्कलाजिनसंवीतां पद्मकर्णावतंसकां ।।
त्रस्तैणशावकदृशं मृणालवलयां शुभां ।। ४०

तां निरीक्ष्य दुराचारः करालः कालनादितः ।।
दधानस्तापसं रूपं देवीपार्श्वमुपागमत् ।। ४१

---

(श्ल १) स्ना

जातकामस्तदा राजन् देवीमिदमवोचत ।
दोलयामि विशालाक्षि त्वामहं बलवानिह ।।
नोत्सहन्ति कुमार्यस्ते दोलां चालयितुं त्विमा[१] । ४२

देव्युवाच ।+ उपवासकृशोऽसि त्वं दूरादभ्यागतोऽधुना ।।
अर्च्चनीयोऽसि कन्यानामेतासां तापसोत्तम ।। ४३

मुनीनां च वयं कन्याः कुलशीलसमन्विताः ।।
दोलारोपमपीच्छामो न परेण कृतं मुने ।। ४४

तूर्णं तस्मादितो याहि सन्तीह मुनिपुंगवाः ।
हृष्टाः प्रतिग्रहीष्यन्ति भवन्तमतिथिं वरम् ।। ४५

वसिष्ठ उवाच :- इत्याकर्ण्य जगन्मातुर्वचनं मधुराक्षरं ।।
करालो विह्वलीभूतः कामबाणार्दितो हृदि ।।
करंग्रहीतुमीशायाः सत्वरं समुपाद्रवत् ।। ४६

---

१ बी नास्ति अयंश्लोक
श्लोक ४८ नास्ति

राजंस्तेनैव रूपेण दुर्निरीक्ष्येण[1] मानवा: ।।
आयान्तमथ तं वीक्ष्य करालं भीषणाकृतिम् ।। ४७

पलायांचक्रिरे कन्या देवानां भयविह्वला: ।।
दैत्योऽभित एहीति भाषमाणा महीपते ।। ४८

देव्युवाच :- माभैष्ट निहनिष्यामि दैत्यमेनं हि लीलया ।।
ईदृशानां सहस्त्राणि निहतानि मया पुरा ।। ४९

इत्थं[2] दोलासनस्थायां ब्रुवत्यां विश्वमातरि ।।
सव्यं[3] महिषहन्तारं पादं जग्राह दुर्मति: ।। ५०

अङ्गुष्ठाग्रेण पादस्य तस्यैव नृपसत्तम ।।
स्मयमानाथ चिक्षेप करालं सासुरेश्वरी ।। ५१

सचांगुष्ठाग्रनिष्पेण भग्नदेहास्थिपञ्जर: ।
उद्वमन् शोणितं वक्त्रात् पपात च ममार च ।। ५२

-----

१ ए दुनिरीक्ष्य
२ ई इच्छंलोका सन स्थानां । ब्रुवसां विश्वमातरि ।
३ सी डी ई सत्यं

ततस्तं पतितं वीक्ष्य दयिता तस्य खेचरी ।।
प्रयाता दिशमाक्रम्य बको यत्रास्ति दानव : ।।
कथयामास तत्सर्वं करालस्य[1] विचेष्टितम् ।। ५३

खेचर्युवाच :- दानवेन्द्र महाबाहो करालस्य तवाज्ञया ।।
स्वैरं विचरतो भूमौ यद्भूतन्निशामय ।। ५४

-----

१ सी डी ई श्च

मर्त्यलोके द्विजस्थानमस्ति श्रीमालसंज्ञया ।।
देवीहरिप्रिया यत्र स्वयमास्ते सहामरै : ।। ५५

तस्य दक्षिणदिग्भागे देवा: संति कृताश्रमा : ।।
मुनिवेषधरा काचिद्बाला कमल लोचना ।। ५६

अधिष्ठात्रींवलोकानाम् अवतीर्णा नितम्बिनी ।।
त्वदर्थं तां समानेतुं त्वरमाण: पतिर्मम ।। ५७

करालो निहतस्तत्र[1] निजाङ्गुष्ठाग्रपीडनात् ।।
ध्वस्तकेशो विरूपाक्षो मूतले स तया[2] हत: ।। ५८

शैलै शोणितदिग्धांगै: प्रियो मे वायसैर्वृत: ।।
शल्यमेतत्कुले जातं दानवानां दनू[3]कोपा। ५९

----

३ ई सी डी तनद्भव : १ सी तस्या २ बी ई मूतया बालबाहत:

नास्ति: श्लोक ५४ स्य अंतिम पंक्ति:
५५ स्य प्रथम: पंक्ति:

बेगादुद्धरदुर्द्धर्ष यदि तेऽस्ति बलं महत् ।। ६०

वसिष्ठ उवाच :- तच्छ्रुत्वा[१] खेचरीप्रोक्तं बज्रपातोपमं वच : ।।
बक: क्रोधात् प्रजज्वाल घृतसिक्त इवानल: ।। ६१

आदिदेश तदा राजन् दानवानामनीकिनीम् ।।
श्रीमानल-क्षेत्रमुद्दिश्य दानवेन्द्र उपाद्रवत् ।। ६२

आयान्ती सा महासेना विचित्रध्वजमालिनी ।।
गगनं पूरयामास हस्त्यश्वरथपंक्तिभि : ।। ६३

बिडालाद्या मृगेन्द्राद्या: खरनेत्रा: प्रहारिण : ।।
केचिदुष्ट्रमुखा राजन् केचित् खरमुखास्तथा ।। ६४

हस्तिव्याघ्रमुखा: केचित् केचिच्च तुरगानना: ।।
केचित्क्रोडमुखा रौद्रा बिडालवदनास्तथा ।। ६५

अनेकविविधैर्वक्त्रै: शूलमुद्गरपाणय: ।।
स्थगयन्तो दिश: सर्वा राजंस्तत्राययु: क्षणात् ।। ६६

----

१ ए तच्छ्रु

धूलीधूसरितं व्योम कम्पिता च वसुंधरा ।।
व्यक्ता दिशो न बीक्ष्यन्ते ययौ क्षोमं महोदधिः ।। ६७

परित्रस्ताः सुराः सर्वे द्विजाश्च मनुजेश्वर ।।
त्वरिताः शरणं जग्मुश्चामुण्डामभयप्रदां ।। ६८

लोकेशां लोकजननीं लोकत्राणपरायणाम् ।।
भुवनार्तिहरां देवीं शरणागतवत्सलाम् ।। ६९

अथदेवान् द्विजेन्द्रांश्च दृष्ट्वा बकभयाङ्कितान् ।।
जगादोच्चैर्महादेवी मा भैष्टि[1] मुहुर्मुहु : ।। ७०

चकाराथ महाराज स्वरूपं भुवनेश्वरी ।
निहृता[2] वै पुरा येन दैव्या दैतेयवाहिनी ।। ७१

बबन्ध हेमकोटीरं मूर्ध्नि रत्नशताञ्चितम् ।
कर्णयोः कुण्डले शुभ्रे चक्रेऽश्वतरकम्बलौ ।। ७२

--------

नास्ति: श्लोक ६७ स्य अंतिम पंक्ति:
६८ स्य उभय पंक्तिश्च

(ए१) मामैष्टंत

(ए२) निहृता

केयूरतदाकानन्तौ कर्कणो कालपिंगलौ
शलापादकर्ककोटौ तुलाकोटिपदे धृतौ ।। ७३

देवी ललाटमालायां नागेन्द्रं विदधे नृप ।
शेषश्च निर्मितो हार: सहस्त्रफणामंडल: ।। ७४

अष्टादशभुजा देवी प्रबुद्धकमलेक्षणा ।।
दंडां[1]डमरूकं घण्टां त्रिशूलं तर्जनीं शरं ।। ७५

पाशं शक्तिं कृपाणं च बिभ्रती दक्षिणे करे
पद्मं[2] चक्रं हलं शूलं गदामस्त्रं कमण्डलुं ।। ७६

पानपात्रं खेटकं च कृत्वा वामकरे नृप ।।
मत्तसिंहवरं देवी देवानामथ पश्यताम् ।।
आरूढा दानवानीकं हन्तुकामा महेश्वरी ।। ७७

ततो वै देवखातस्य कुण्डस्य विमलाम्भस : ।।
कोणात: प्रगृहीत[illegible]: सन्नद्धा वरवाहना :।।। ७८

------

१ ई मरकंघंटा
२. बी दलं

कोटीरकुण्डलधरा भासयन्त्यो दिशो दश ।।
सहायार्थं जगन्मातुर्निपेतुः सम्प्रशक्तयः ।। ७६

ताभिः परिवृता देवी दैत्यान् हन्तुं प्रचक्रमे ।।
स्तूयमाना महादेवी देवगान्धर्वकिन्नरैः ।। ८०

बहिर्गत्वाश्रमात्तस्मात्पादपैश्शंकिता ।।
आजुहाव रणे दैत्यं बकमुग्रपराक्रमम् ।। ८१

ततस्ते दानवा दैत्याश्चामुण्डां शक्तिभिः सह ।।
तेजोदीपितदिक्कोणां वीक्ष्य जाता भयातुराः ।। ८२

वाराही घुर्घुरारावं नारसिंह महारवान् ।।
कुर्वत्यौ दैत्ययोद्धानां बलहानिं प्रचक्रतुः ।। ८३

अथ वीक्ष्य समेतास्ता दानवो देवकण्टक : ।।
सिंहनादं परं चक्रे पूरयन् ककुभो बक : ।। ८४

-----

बी ३ सर्वशक्ताय: ई शक्तूय:, ४ बी ई- कुर्वन्त्यो दैत्ययोधानां बलहानिं प्रचक्रमुः, बी ५ सिंहनादरवं चक्रे ।

(ए १) भासयन्तो
(ए २) कुर्वन्त्यौ

---

ततः प्रबवृते युद्धं मातृणां दानवैः सह ।।
देवा गगनमास्थाय तस्थुर्देवीजयैषिणः ।। ८५

यथा वर्षति पर्ज्जन्यो वारिधाराभिरम्बरम् ।।
तथैव दानवानीकमप्यवर्षन् महेषुभिः ।। ८६

सायकैः कर्णनालीकैर्नाराचैर्भल्लतोमरैः ।।
वत्सदन्तैः बिषाणाग्रैः क्षुरप्रैरर्द्धचन्द्रकैः ।। ८७

भिण्डिपालैश्च मुशलैर्दोर्दण्डैः परिघैस्तथा[1] ।।
आवृता रोदसी राजन् बिमुक्तैर्दैत्यदानवैः ।। ८८

शक्तयो[3]ऽथ महासैन्यं दानवानां दुरासदम् ।।
बिभिदुःशस्त्रपातैन घनाः सेतुमि[2]वाम्बुभिः ।। ८९

ब्रह्माणी ब्रह्मदण्डेन निजधान महासुरान् ।।
शाम्भवी च त्रिशूलेन योधान् बिव्याध विद्विषाम् ।। ९०

----

१ बी भिंदपाल गदादंण्डैः परिघै मुसलैस्तथा ।
२ सी डी ई घन सेतुभिवा ।

(ए ३) शक्तयौथ

वैष्णवी चक्रपातेन चूर्णयामास कोटिश: ।।
कौमारी शक्तिमिर्भिन्ना: निपेतु: परितो भुवि ।। ६१

ऐन्द्री कुलिशधाराभि: पिपेष तिलशो द्विष : ।।
वाराही तीक्ष्णदंष्ट्राभिर्द्विधाचक्रे बकानुगान् ।। ६२

नारसिंही करालास्या रथांश्च रथिभि: सह ।।
सारोहान् कुंजरेन्द्रांश्च तुरंगान् सहसादिभि :

करेणाकृष्य चिक्षेप लीलया मुखगह्वरे ।। ६३

शोणितै: सर्वत: शान्तं पादोद्धूतं महीरज : ।।
आकीर्णा सायकैर्भूमि: कुशैरिव महामख : ।। ६४

छिन्नपादकर-ग्रीवा कर्णनासोष्ठलोचना : ।।
छिन्नहृत्पिञ्जरा: केचिन्निपेतुरमरद्विष : ।। ६५

देवींचापि तदा जघ्नु: क्रुद्धा दैत्यैयदानवा: ।।
रथाश्वै: कोष्ठकीकृत्य चामुण्डा शक्तिभि: सह ।। ६६

------

१ बी ईतीक्ष्णदंष्ट्राभिर्द्वि: प्रचक्रे
२ सी डी ई महाराज:
(ए ३) पादोद्धूतं

दानवेन्द्रो बकस्तूर्णं हन्यमाने तदाबले ।।
अभ्यधावत् सुसंरब्धः कालिकां कालनोदितः ।। ६७

तमापतन्तं वेगेन देवी शूलेन वक्षसि ।
तस्य तूर्त हृदयं भित्वा निममज्ज महीतले ।। ६८

वैलदयादथ शस्त्राणि भिन्नमर्मा बको नृप ।।
दुर्मतिर्दूरमाक्षिप्य प्राद्रवच्चण्डिकामनु ।। ६९

वेगादापततस्तस्य मार्गे सिंहो रुरोध वै ।।
वाममुष्टिप्रहारेण दैत्येन्द्रस्तमपातयत् ।। १००

देवीं गृहीतुकामोऽसौ प्रसह्य मदनातुर : ।।
सामीप्यंप्राप्य भूपाल पार्ष्णि के शार्ङ्गमाक्षिपत् ।। १०१

ततस्तं खगमाकृष्य कान्तिजालसमाकुलम् ।
हुङ्कृत्य जगतांमाता मूर्ध्नि देशेऽभ्यताडयत् ।। १०२

-----

१ सी मपातयत्  २ बी ई प्रहस्य  ३ ए अम्प

(ए ४) स्तूर्णं
( ए२) समीप्यं

स हि तैन प्रहारेण द्विधाकृततनुस्तदा ।।
निपपात महीपृष्ठे मूलच्छिन्न इव द्रुमः ।। १०३

दानवेन्द्रे हते तस्मिन् बके पर बलार्द्दिनि ।।
आययुस्त्वरिता देवा हर्ष-बाष्पाकुलेक्षणा ।। १०४

शक्तिहुंकारनिर्दग्धा दानवेन्द्रमहाचमू : ।।
जाता रणाजिरे तत्र राजन् भस्ममयी स्थली ।। १०५

बिबिशुः केऽपि पातालं केचिद्भग्ना दिशो ययु : ।।
प्रविष्टाः सागरे केचिद्भयार्ता निहते बके ।। १०६

ततः शान्ता दिशः सर्वाः प्रसन्नपवनो ववौ । ।
प्रससार दिनेशस्य बिमला किरणाबली ।। १०७

अथ देवा द्विजेन्द्राश्च तुष्टुवुस्तां महेश्वरी ।। १०८

देवा ऊचु :- नमो नमस्तेऽखिललोकमातः । ययोद्धृतं शल्यमिदं सुराणां[1] ।।
यत्राच्युतब्रह्ममहेश्वराणां । कुण्ठी बभूवुः प्रबलायुधानि[2] ।। १०९

-----

१ बी ई नराणाम् २ बी ई प्रवरायुधानि (एई) ययोध्दतं

----

क्व देवि देवा मुनयोऽपि कुत्र ।। क्व चेयमुर्वी क्व च चन्द्र सूर्यो ।।
देवी प्रसन्ना कृपयावतीर्य ।। नदैत्यनाशं भवती करोति ।। ११०

प्रसीद कुन्देन्दुमृणालशुभ्रां ।। दृष्टिं दधाना प्रणतेषु नित्यं ।।
प्रसीद विश्वेश्वरि लोकमालामिमामवन्ती विविधावतारैः ।। १११

दृशौ भवत्याः शशिसूर्यबिम्बे ।। ययोःकृतः स्याज्जगति प्रकाशः ।।
समस्तगीर्वाणिमहः कथं वै,, त्वमम्ब जाता जगतां हिताय ।। ११२

समस्तदेवायुधसारकृष्टै । वैरायुधैः पासि च विश्वमेतत् ।।
त्वमाकरश्चण्डि चतुर्विधस्य ।। सर्गस्य नित्यं कथिता मुनीन्द्रैः ।। ११३

कल्पान्तकाले निलयं प्रजाना । मेकैव मातस्त्वमपाम्बिवाब्धिः ।।
त्वं भैरवी पापकृतां नितान्त मजस्त्रधर्माश्रयिणां त्वमार्या ।। ११४

स्वर्गापवर्गातिनिबन्धनाय ।। त्वमिज्यसे देवि महर्षिवृन्दैः ।।
लक्ष्मीस्त्वमुत्सर्गमुपैषि विष्णो ।। जीवातुरास्य जगत्त्रयस्य ।। ११५

----

१ इ॑ दृशौ
२ वी यतः कृतः स्याज्जगति प्रकाशः ई यतोकृतः स्याज्जगति
३ ई वैरायुधपासि
४ ई चतुर्विधस्यनित्यं ( ए 6) दशो
५ ई जानां एकैवमातात्वम
६ ई पापनितांत

१
सुखात्मिका खेलसि चित्तवृत्तौ ।। शरीरिणामम्ब चराचराणाम् ।।

२
विद्यात्मिका प्रीणयसे नितांतं ।। निर्वाणदानेन वने मुमुक्षून् ।। ११६

३ ४ ६(१)
स्वाहा स्वधा त्वं सुमना: पितृणां ।। आह्लादयित्री सततं सुरेशान् ।।

५
जगत्त्रयीपादपपर्णमूला ।।

दुन्मूलितोद्दामविष्यदैतै : ।। ११७

यदि प्रसन्ना जगतां हिताय ।।

६
न रूपमाविष्कुरुषे त्वमुग्रम् ।। ११८

पादेन पिष्टो महिषासुरेन्द्र: ।।

पुरा पुरारेरपिदु:प्रधृष्य: ।। ११८

रणे जिघृक्षु: स च धूम्रनेत्रो ।।

हवि: कृतो हुंकृतिधूमकेतौ ।।

शक्ति: परा काचिदचिन्त्यरूपा ।।

त्वं पासि लोकानभितो विपद्भ्य: ।। ११६

७
मातेव दुर्भिक्षहतान् क्षुधार्तान् ।।

प्रीणासि शाकम्भरि शाकवर्षै: ।। १२०

त्वदिच्छालवसम्भूता: । त्वत्पदाम्भोजसेविन :

८
वकदैत्याम्बुधौ मग्ना हेलयैवोध्दृतास्त्वया ।। १२१

----

१ ई मूखा   २ ई विस्वात्मिकाप्राणायसेनितांतं   ३ ई आल्पाद
४ ई सुरेशे   ५ ई मूला ।। दुन्म् ( ए मूला, ।। दुमु) ६ बी ई तन्द्रूपमावि-
ष्कुरुषो त्वमुग्रम्  ६ (१)ए- सुरेन्द, ७ बी ई मातेव दुर्भिक्षं दवानलार्त्तानि,
८ ई- हृतात्वया ।

एवमेव सुरारीणां दाय: कार्यस्त्वयाम्बिके ।।
सर्वज्ञानमयि देवि प्रसीद परमेश्वरि ।। १२२

देव्युवाच :- वरदाहं सुरश्रेष्ठास्तवेनानेन सम्प्रति ।।
यस्य यन्मनसोऽभीष्टं तुष्टा दास्यामि तस्य तत् ।। १२३

देवा ऊचु: अयमेव सुरौघानामासीद्देवि वर: पर: ।।
भुवनार्तिकर: संख्ये यत्त्वया निहतो बक: ।। १२४

इमं तु वरमेकं हि दत्तमिच्छन्ति देवता : ।।
न श्रीमालं त्वया त्याज्यं लोकानां हितकाम्यया ।। १२५

अस्मिन्नस्मत्कृते कुण्डे स्थातव्यमनिशं त्वया ।। १२६

इयं बकवधाभूमि: सर्वैर्देवै: समाश्रिता ।।
बकस्थलीतिविख्याता लोकेऽस्तु त्वदनुग्रहात् ।। १२७

देव्युवाच :- बकस्थलीति विख्यातिं यास्यत्येषा जगत्त्रये ।।
आश्रमो भवतां देवा यत्र दैत्यो बको हत: ।। १२८

---

१ इ मयैदे
२ ई इमंतुवरमेकांते । दत मिछंतिदेवता । ३ ई लोकस्त्वत्वदनु
४ बी ई बकस्थलमिति ख्यातिं यास्यत्यैतज्जगत्त्रये ।

अत्र प्रीत्या निवत्स्यामि देवानामहमन्वहं ।।
पूरयन्ती प्रसन्नानां वाञ्छितानि समाश्रिता ।। १२६

अस्मिन् कुण्डे करिष्यन्ति स्नानं नियमान्विता: ।।
न तेषां प्रभविष्यन्ति कदाचिदपि शत्रव: ।। १३०

राज्यभ्रष्टो महीपालो मामाराध्य बकस्थले ।।
लप्स्यते त्वचिरादेव राज्यं निहतकण्टकं ।। १३१

ये बकस्थलमालम्ब्य भोजयिष्यन्ति ब्राह्मणान् ।।
तेभ्य: प्रीता प्रदास्यामि यदपि स्यात् सुदुर्लभं ।। १३२

या वै शुक्ल-तृतीयायां नारी स्नानं करिष्यति ।।
कुण्डे मम न सा दु:खं प्राप्स्यति दर्भिता क्वचित् ।। १३३

अपि पापशतैर्दग्धा ये नरा: पुरतो मम ।।
कुण्डे स्नात्वा तुठिष्यन्ति न तेषां नरकाद्भयं ।। १३४

------

१ ई तरयंता प्रपन्तानां , २ सी डी लभते २(१)ई लम्यते

३ बी ई – पुरतोयदि ।।

४ ए ब्रमसनम्

शत्रुसंकटयातानां दीनानां समरे नृणाम् ।।
आपदः स्मरणादेव नाशयिष्याम्यसंशयम् ।। १३५

१
देवतास्त्रिदिवं यान्तु प्रशान्तभयहेतवः ।।
यदा यदारिबाधाः स्युः स्मर्त्तव्याहं तदा तदा ।। १३६

वशिष्ठ उवाच :- इत्युक्तास्ते तदा देवा मातृन् प्राहुरिदं वचः ।।
मातरो नः प्रसीदन्तु वरं वृण्वन्तु वाञ्छितम् ।।
इदं बकानुगं सैन्यं याभिर्विध्वस्तमोजसा ।। १३७

देव्य ऊचु :- स्थितिमत्र करिष्यामो देव्याः पार्श्वे वयं सुराः
नातिदूरे बकस्थल्याः सर्वलोकहिताय वै ।। १३८

दास्यामो विविधान् कामान् येऽस्मान् स्तोष्यन्ति भक्तित : ।।
सप्तम्यामर्चयिष्यन्ति दास्यामस्तस्य वाञ्छितम् । १३९

देवा ऊचु :- ये युष्मानर्च्चयिष्यन्ति बकस्थल्याः समीपगा :
यास्यन्ति विलयं तेषां भक्तानामापदः क्षणात् ।। १४०

---

२ बी सप्तम्यामर्चयेद् यो ऽस्मान् तस्य दास्यामि वाञ्छितम् ।
१-१३६ श्लोकस्य पूर्वं अधिकं श्लोकम् —
मातृभ्यायं भोज्यमं करिष्यतं पुरस्तान्तरामम् ।।
मर्बतृ दुर्गति स्तेषां ।। नेवयाबकुलत्रयं ।।

३ ए मातृ

कुण्डकोणात् समुत्पन्ना लोकानां त्राणहेतवे ।।
कौणिक्य इति नाम्ना वै ख्यातास्तेन भविष्यथ ।। १४१

योऽर्च्चयित्वात्र चामुण्डां न युष्मानर्च्चयिष्यति ।।
तस्य यात्राफलं देवी चामुण्डा न प्रदास्यति ।। १४२

वसिष्ठ उवाच :- अथामन्त्र्य सुराः सर्वे चामुण्डां बकनाशिनीम् ।
ताश्च मातृः[1] प्रमुदिताः शीघ्रं स्वर्गमितो ययुः ।। १४३

ततः प्रभृति सा देवी चामुण्डा तत्र भूपते ।।
कौणिक्यश्चेति विख्याता मातरःकामदा नृणाम् ।। १४४

अत्र गाथा पुरा गीता तीर्थ-यात्रामुपेत्य वै[2] ।।
चूडिना द्विजवर्य्येण तां शृणुष्व विशांपति ।। १४५

चूडिरुवाच :- देवीकुण्डे नरः स्नात्वा चामुण्डां यो बकस्थले ।।
पश्येच्छ्रध्दाविहीनोऽपि स स्वर्गी न च नारकी ।। १४६

----

१ ए मातृ (ए २) वै

एतत्ते कथितं राजन् यथा जाता बकस्थली ।।
य इदं श्रृणुयाम्दक्त्या चामुण्डाचरितं सुधी : ।।
१
आपदस्तस्य नश्यन्ति कल्याणं चोपपद्यते ।। १४७

इति श्री स्कंदपुराणे एकाशीतिसाहस्र्यां संहितायां ब्राह्म्य विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये चामुण्डा-माहात्म्यं नामचतुर्विंशोऽध्याय: ।। २४ ।।

----

ए १ नस्यन्ति